# MANDUKYA UPANISHAD

## *Gaudapada's Karika*

## CHAPTER 1 - AGAMA PRAKARANA

# SHANTHI MANTRA

**Shanti Mantra :**

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभि
र्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं
यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा वि
श्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृह
स्पतिर्दधातु । ॐ शान्तिः शान्तिः शान्तिः ।

om bhadraṁ karṇebhiḥ śṛṇuyāma devāḥ,
bhadraṁ paśyemākṣabhiryajatrāḥ,
sthirairaṅgaistuṣṭuvāṁ̐sastanūbhiḥ, vyaśema
devahitaṁ yadāyuḥ, svasti na indrovṛddhaśravāḥ,
svasti naḥ pūṣā Viśva vedāḥ, svasti nastārkṣyo
ariṣṭanemiḥ, svasti no bṛhaspatirdadhātu,
om śāntiḥ śāntiḥ śāntiḥ.

# MANGALA SHLOKA

**Mangala Shloka 1**

प्रज्ञानांशुप्रतानैः स्थिरचरनिकरव्यापिभिर्व्याप्य लोकान्
भुक्त्वा भोगान् स्थविष्ठान् पुनरपि धिषणोद्भासितान्
कामजन्यान्। पीत्वा सर्वान् विशेषान् स्वपिति मधुरभुङ्
मायया भोजयन्नो मायासंख्यातुरीयं परममृतमजं
ब्रह्म यत्तन्नतोऽस्मि ॥ १ ॥

prajñānāmśupratānaiḥ
sthiracaranikaravyāpibhirvāpya lokan
bhuktvā bhogān sthaviṣṭhān punarapi
dhiṣaṇodbhāsitān kāmajanyān
pītvā sarvān viśeṣān svapiti madhurabhuṅmāyayā
bhojayannaḥ māyāsankhyāturīyaṁ
paramamṛtamajaṁ brahma yattannato'smi || 1 ||

**Mangala Shloka No. 2 :**

यो विश्वात्मा विधिजविषयान् प्राश्य भोगान् स्थविष्ठान्
पश्चाच्चान्यान् स्वमतिविभवान् ज्योतिषा स्वेन सूक्ष्मान् ।
सर्वानितान् पुनरपि शनैः स्वात्मनि स्थापयित्वा
हित्वा सर्वान् विशेषान् विगतगुणगणः पात्वसौ
नस्तुरीयः ॥ २ ॥

yoviśvātmā vidhijavişayān prāśya bhogān sthavişṭhān
paścāccānyān svamati vibhavān jyotiṣā śvena sūkṣmān
sarvānetānpunarapi śanaiḥ svātmani sthāpayitvā
hitvā sarvān viśeṣān vigataguṇagaṇaḥ pātvasau
nastuturīyaḥ: || 2 ||

# MANTRA 1 TO 12

# Mantra 1

ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं
भूतं भवद्भविष्यदिति सर्वमोङ्कार एव ।
यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव ॥ १ ॥

omityetadakṣaramidaṃ sarvaṃ tasyopavyākhyānaṃ
bhūtaṃ bhavadbhaviṣyaditi sarvamoṅkāra eva |
yaccānyattrikālātītaṃ tadapyoṅkāra eva || 1 ||

## Mantra 2

सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म
सोऽयमात्मा चतुष्पात् ॥ २ ॥

sarvaṃ hyetad brahmāyamātmā brahma
so 'yamātmā catuṣpāt || 2 ||

## Mantra 3

जागरितस्थानो बहिष्प्रज्ञः सप्ताङ्ग
एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः
प्रथमः पादः ॥ ३ ॥

Jāgaritasthāno bahiṣprajñaḥ saptāṅga
ekonaviṃśatimukhaḥ sthūlabhugvaiśvānaraḥ
prathamaḥ pādaḥ || 3 ||

## Mantra 4

स्वप्नस्थानोऽन्तः प्रज्ञाः सप्ताङ्ग एकोनविंशतिमुखः
प्रविविक्तभुक्तैजसो द्वितीयः पादः ॥ ४ ॥

svapnasthāno'ntaḥ prajñāḥ saptāṅga ekonaviṃśatimukhaḥ
praviviktabhuktaijaso dvitīyaḥ pādaḥ || 4 ||

## Mantra 5

यत्र सुप्तो न कञ्चन कामं कामयते
न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम् ।
सुषुप्तस्थान एकीभूतः प्रज्ञानघन
एवाऽऽनन्दमयो ह्यानन्दभुक् चेतोमुखः
प्राज्ञस्तृतीयः पादः ॥ ५ ॥

yatra supto na kaňcana kāmaṃ kāmayate
na kaňcana svapnaṃ paśyati tatsuṣuptam |
suṣuptasthāna ekībhūtaḥ prajñānaghana
evā''nandamayo hyānandabhuk cetomukhaḥ
prājñastṛtīyaḥ pādaḥ || 5 ||

## Mantra 6

एष सर्वेश्वरः एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः
सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥ ६ ॥

eṣa sarveśvaraḥ eṣa sarvajña eṣo'ntaryāmyeṣa yoniḥ
sarvasya prabhavāpyayau hi bhūtānām || 6 ||

# Mantra 7

नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतः
प्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम् ।
अदृश्यमव्यवहार्यमग्राह्यमलक्षणम्
अचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं
प्रपञ्चोपशमं शान्तं शिवमद्वैतं
चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥ 7 ॥

nāntaḥprajñaṃ na bahiḥprajñaṃ nobhayataḥ
prajñaṃ na prajñānaghanaṃ na prajñaṃ nāprajñam |
adṛśyamavyavahāryamagrāhyamalakṣaṇam
acintyamavyapadeśyamekātmapratyayasāraṃ
prapañcopaśamaṃ śāntaṃ śivamadvaitaṃ
caturthaṃ manyante sa ātmā sa vijñeyaḥ || 7 ||

**Mantra 8**

सोऽयमात्माध्यक्षरमोङ्कारोऽधिमात्रं पादा

मात्रा मात्राश्च पादा अकार उकारो मकार इति ॥ ८ ॥

so'yamātmādhyakṣaramoṅkāro'dhimātraṃ pādā

mātrā mātrāśca pādā akāra ukāro makāra iti || 8 ||

## Mantra 9

जागरितस्थानो वैश्वानरोऽकारः प्रथमा
मात्राऽऽप्तेरादिमत्त्वाद्वाप्नोति ह वै
सर्वान्कामानादिश्च भवति य एवं वेद ॥ ९ ॥

jāgaritasthāno vaiśvānaro'kāraḥ prathamā
mātrā''pterādimattvādvāpnoti ha vai
sarvāṅkāmānādiśca bhavati ya evaṃ veda || 9 ||

## Mantra 10

स्वप्नस्थानस्तैजस उकारो द्वितीया
मात्रोत्कर्षादुभयत्वाद्वोत्कर्षति ह वै
ज्ञानसन्ततिं समानश्च भवति
नास्याब्रह्मवित्कुले भवति य एवं वेद ॥ १० ॥

svapnasthānastaijasa ukāro dvitīyā
mātrotkarṣādubhayatvādvotkarṣati ha vai
jñānasantatiṃ samānaśca bhavati
nāsyābrahmavitkule bhavati ya evaṃ veda || 10 ||

## Mantra 11

सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा
मितेरपीतेर्वा मिनोति ह वा इदं सर्वमपीतिश्च
भवति य एवं वेद ॥ ११ ॥

suṣuptasthānaḥ prājño makārastṛtīyā mātrā
miterapītervā minoti ha vā idaṃ sarvamapītiśca
bhavati ya evaṃ veda || 11 ||

# Mantra 12

अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः
शिवोऽद्वैत एवमोङ्कार आत्मैव
संविशत्यात्मनाऽऽत्मानं य एवं वेद ॥ १२ ॥

amātraścaturtho'vyavahāryaḥ prapañcopaśamaḥ
śivo'dvaita evamoṅkāra ātmaiva
saṃviśatyātmanā''tmānaṃ ya evaṃ veda || 12 ||

# KARIKA NO. 1 TO 29

## Chapter 1 - Verse 1

बहिष्प्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः ।
घनप्रज्ञस्तथा प्राज्ञ एक एव त्रिधा स्मृतः ॥ १ ॥

bahiṣprajño vibhurviśvo hyantaḥprajñastu taijasaḥ |
ghanaprajñastathā prājña eka eva tridhā smṛtaḥ || 1 ||

## Chapter 1 - Verse 2

दक्षिणाक्षिमुखे विश्वो मनस्यन्तस्तु तैजसः ।
आकाशे च हृदि प्राज्ञस्त्रिधा देहे व्यवस्थितः ॥ २ ॥

dakṣiṇākṣimukhe viśvo manasyantastu taijasaḥ |
ākāśe ca hydi prājñastridhā dehe vyavasthitaḥ ||

## Chapter 1 - Verse 3

विश्वो हि स्थूलभुङ्नित्यं तैजसः प्रविविक्तभुक् ।
आनन्दभुक्तथा प्राज्ञस्त्रिधा भोगं निबोधत ॥ ३ ॥

viśvo hi sthūlabhuṅnityaṃ taijasaḥ praviviktabhuk |
ānandabhuktathā prājñastridhā bhogaṃ nibodhata || 3 ||

## Chapter 1 - Verse 4

स्थूलं तर्पयते विश्वं प्रविविक्तं तु तैजसम् ।
आनन्दश्च तथा प्राज्ञं त्रिधा तृप्तिं निबोधत ॥ ४ ॥

sthūlaṃ tarpayate viśvaṃ praviviktaṃ tu taijasam |
ānandaśca tathā prājñaṃ tridhā tṛptiṃ nibodhata || 4 ||

## Chapter 1 - Verse 5

त्रिषु धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्तितः ।
वेदैतदुभयं यस्तु स भुञ्जानो न लिप्यते ॥ ५ ॥

trişu dhāmasu yadbhojyaṃ bhoktā yaśca prakīrtitaḥ |
vedaitadubhayaṃ yastu sa bhuñjāno na lipyate || 5 ||

## Chapter 1 - Verse 6

प्रभवः सर्वभावानां सतामिति विनिश्चयः ।
सर्वं जनयति प्राणश्चेतोंशून्पुरुषः पृथक् ॥ ६ ॥

prabhavaḥ sarvabhāvānāṃ satāmiti viniścayaḥ |
sarvaṃ janayati prāṇaścetoṃśūnpuruṣaḥ pṛthak || 6 ||

## Chapter 1 - Verse 7

विभूतिं प्रसवं त्वन्ये मन्यन्ते सृष्टिचिन्तकाः ।
स्वप्नमायासरूपेति सृष्टिरन्यैर्विकल्पिता ॥ ७ ॥

vibhūtiṃ prasavaṃ tvanye manyante sṛṣṭicintakāḥ |
svapnamāyāsarūpeti sṛṣṭiranyairvikalpitā || 7 ||

## Chapter 1 - Verse 8

इच्छामात्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चिताः ।
कालात्प्रसूतिं भूतानां मन्यन्ते कालचिन्तकाः ॥ ८ ॥

icchāmātraṃ prabhoḥ sṛṣṭiriti sṛṣṭau viniścitāḥ |
kālātprasūtiṃ bhūtānāṃ manyante kālacintakāḥ || 8 ||

## Chapter 1 - Verse 9

भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे ।
देवस्यैष स्वाभावोऽयमाप्तकामस्य का स्पृहा ॥ ९ ॥

bhogārthaṃ sṛṣṭirityanye krīḍārthamiti cāpare |
devasyaiṣa svābhāvo'yamāptakāmasya kā spṛhā || 9 ||

## Chapter 1 - Verse 10

निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्ययः ।
अद्वैतः सर्वभावानां देवस्तुर्यो विभुः स्मृतः ॥ १० ॥

nivṛtteḥ sarvaduḥkhānāmīśānaḥ prabhuravyayaḥ |
advaitaḥ sarvabhāvānāṃ devasturyo vibhuḥ smṛtaḥ || 10 ||

## Chapter 1 - Verse 11

कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ ।
प्राज्ञः कारणबद्धस्तु द्वौ तौ तुर्ये न सिद्ध्यतः ॥ ११ ॥

kāryakāraṇabaddhau tāviṣyete viśvataijasau |
prājñaḥ kāraṇabaddhastu dvau tau turye na siddhytaḥ || 11 ||

## Chapter 1 - Verse 12

नाऽऽत्मानं न परंश्चैव न सत्यं नापि चानृतम् ।
प्राज्ञः किंचन संवेत्ति तुर्यं तत्सर्वदृक्सदा ॥ १२ ॥

nā''tmānaṃ na paraṃścaiva na satyaṃ nāpi cānṛtam |
prājñaḥ kiṃcana saṃvetti turyaṃ tatsarvadṛksadā || 12 ||

## Chapter 1 - Verse 13

द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययोः ।
बीजनिद्रायुतः प्राज्ञः सा च तुर्ये न विद्यते ॥ १३ ॥

dvaitasyāgrahaṇaṃ tulyamubhayoḥ prājñaturyayoḥ |
bījanidrāyutaḥ prājñaḥ sā ca turye na vidyate || 13 ||

## Chapter 1 - Verse 14

स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया ।
न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः ॥ १४ ॥

svapnanidrāyutāvādyau prājñastvasvapnanidrayā |
na nidrāṃ naiva ca svapnaṃ turye paśyanti niścitāḥ || 14 ||

## Chapter 1 - Verse 15

अन्यथा गृह्णतः स्वप्नो निद्रा तत्त्वमजानतः ।
विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते ॥ १५ ॥

anyathā gṛhṇataḥ svapno nidrā tattvamajānataḥ |
viparyāse tayoḥ kṣīṇe turīyaṃ padamaśnute || 15 ||

## Chapter 1 - Verse 16

अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥ १६ ॥

anādimāyayā supto yadā jīvaḥ prabudhyate |
ajamanidramasvapnamadvaitaṃ budhyate tadā || 16 ||

## Chapter 1 - Verse 17

प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥ १७ ॥

prapañco yadi vidyeta nivarteta na saṃśayaḥ |
māyāmātramidaṃ dvaitamadvaitaṃ paramārthataḥ || 17 ||

## Chapter 1 - Verse 18

विकल्पो विनिवर्तेत कल्पितो यदि केनचित् ।
उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते ॥ १८ ॥

vikalpo vinivarteta kalpito yadi kenacit |
upadeśādayaṃ vādo jñāte dvaitaṃ na vidyate || 18 ||

**Chapter 1 - Verse 19**

विश्वस्यात्वविवक्षायामादिसामान्यमुत्कटम् ।
मात्रासंप्रतिपत्तौ स्यादाप्तिसामान्यमेव च ॥ १९ ॥

viśvasyātvavivakṣāyāmādisāmānyamutkaṭam |
mātrāsaṃpratipattau syādāptisāmānyameva ca || 19 ||

**Chapter 1 - Verse 20**

तैजसस्योत्वविज्ञान उत्कर्षो दृश्यते स्फुटम् ।
मात्रासंप्रतिपत्तौ स्यादुभयत्वं तथाविधम् ॥ २० ॥

taijasasyotvavijñāna utkarṣo dṛśyate sphuṭam |
mātrāsaṃpratipattau syādubhayatvaṃ tathāvidham || 20 ||

## Chapter 1 - Verse 21

मकारभावे प्राज्ञस्य मानसामान्यमुत्कटम् ।
मात्रासंप्रतिपत्तौ तु लयसामान्यमेव च ॥ २१ ॥

makārabhāve prājñasya mānasāmānyamutkaṭam |
mātrāsaṃpratipattau tu layasāmānyameva ca || 21 ||

## Chapter 1 - Verse 22

त्रिषु धामसु यस्तुल्यं सामान्यं वेत्ति निश्चितः ।
स पूज्यः सर्वभूतानां वन्द्यश्चैव महामुनिः ॥ २२ ॥

triṣu dhāmasu yastulyaṃ sāmānyaṃ vetti niścitaḥ |
sa pūjyaḥ sarvabhūtānāṃ vandyaścaiva mahāmuniḥ || 22 ||

## Chapter 1 - Verse 23

अकारो नयते विश्वमुकारश्चापि तैजसम् ।
मकारश्च पुनः प्राज्ञं नामात्रे विद्यते गतिः ॥ २३ ॥

akāro nayate viśvamukāraścāpi taijasam |
makāraśca punaḥ prājñaṃ nāmātre vidyate gatiḥ || 23 ||

## Chapter 1 - Verse 24

ओंकारं पादशो विद्यात्पादा मात्रा न संशयः ।
ओंकारं पादशो ज्ञात्वा न किंचिदपि चिन्तयेत् ॥ २४ ॥

oṃkāraṃ pādaśo vidyātpādā mātrā na saṃśayaḥ |
oṃkāraṃ pādaśo jñātvā na kiṃcidapi cintayet || 24 ||

**Chapter 1 - Verse 25**

युञ्जीत प्रणवे चेतः प्रणवो ब्रह्म निर्भयम् ।
प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित् ॥ २५ ॥

yuñjīta praṇave cetaḥ praṇavo brahma nirbhayam |
praṇave nityayuktasya na bhayaṃ vidyate kvacit || 25 ||

**Chapter 1 - Verse 26**

प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः स्मृतः ।
अपूर्वोऽनन्तरोऽबाह्योऽनपरः प्रणवोऽव्ययः ॥ २६ ॥

praṇavo hyaparaṃ brahma praṇavaśca paraḥ smṛtaḥ |
apūrvo'nantaro'bāhyo'naparaḥ praṇavo'vyayaḥ || 26 ||

**Chapter 1 - Verse 27**

सर्वस्य प्रणवो ह्यादिर्मध्यमन्तस्तथैव च ।
एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम् ॥ २७ ॥

sarvasya praṇavo hyādirmadhyamantastathaiva ca |
evaṃ hi praṇavaṃ jñātvā vyaśnute tadanantaram || 27 ||

**Chapter 1 - Verse 28**

प्रणवं हीश्वरं विद्यात्सर्वस्य हृदि संस्थितम् ।
सर्वव्यापिनमोंकारं मत्वा धीरो न शोचति ॥ २८ ॥

praṇavaṃ hīśvaraṃ vidyātsarvasya hṛdi saṃsthitam |
sarvavyāpinamoṃkāraṃ matvā dhīro na śocati || 28 ||

# Chapter 1 - Verse 29

अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः ।
ओंकारो विदितो येन स मुनिर्नेतरो जनः ॥ २९ ॥

amātro'nantamātraśca dvaitasyopaśamaḥ śivaḥ |
oṃkāro vidito yena sa munirnetaro janaḥ || 29 ||